श्री काळिका कीलक स्तोत्रं

श्री काळिका कीलक स्तोत्रं

अस्य श्री काळिका कीलकस्य सदाशिव ऋषिः अनुष्टुप् छंदः श्री दक्षिणकाळिका देवता सर्वार्थसिद्धिसाधने कीलकन्यासे जपे विनियोगः |

अथातः संप्रवक्ष्यामि कीलकं सर्वकामदं |
काळिकायाः परं तत्त्वं सत्यं सत्यं त्रिभिर्ममः || 1 ||

दुर्वासाश्च वशिष्ठश्च दत्तात्रेयो बृहस्पतिः |
सुरेशो धनदश्चैव अंगिराश्च भृगूद्वाहः || 2 ||

च्यवनः कार्तवीर्यश्च कश्यपोऽथ प्रजापतिः |
कीलकस्य प्रसादेन सर्वैश्वर्यमवाप्नुयुः || 3 ||

ओंकारं तु शिखाप्रांते लंबिका स्थान उत्तमे |
सहस्रारे पंकजे तु क्रीं क्रीं क्रीं वाग्विलासिनी || 4 ||

कूर्चबीजयुगं भाले नाभौ लज्जायुगं प्रिये |
दक्षिणे काळिके पातु स्वनासापुटयुग्मके || 5 ||

हूंकारद्वंद्वं गंडे द्वे द्वेमाये श्रवणद्वये |
आद्यातृतीयं विन्यस्य उत्तराधर संपुटे || 6 ||

स्वाहा दशनमध्ये तु सर्ववर्णन्न्यसेत् क्रमात् |
मुंडमाला असिकरा काळी सर्वार्थसिद्धिदा || 7 ||

चतुरक्षरी महाविद्या क्रीं क्रीं हृदय पंकजे |
ॐ हूं ह्रीं क्रीं ततो हूं फट् स्वाहा च कंठकूपके || 8 ||

अष्टाक्षरी काळिकाया नाभौ विन्यस्य पार्वति |
क्रीं दक्षिणे काळिके क्रीं स्वाहांते च दशाक्षरी || 9 ||

मम बाहुयुगे तिष्ठ मम कुंडलिकुंडले |
हूं ह्रीं मे वह्निजाया च हूं विद्या तिष्ठ पृष्ठके || 10 ||

क्रीं हूं ह्रीं वक्षदेशे च दक्षिणे काळिके सदा |
क्रीं हूं ह्रीं वह्निजायाऽंते चतुर्दशाक्षरेश्वरी || 11 ||

क्रीं तिष्ठ गुह्यदेशे मे एकाक्षरी च काळिका |
ह्रीं हूं फट् च महाकाळी मूलाधारनिवासिनी || 12 ||

सर्वरोमाणि मे काळी करांगुळ्यंकपालिनी |
कुल्ला कटिं कुरुकुल्ला तिष्ठ तिष्ठ सदा मम || 13 ||

विरोधिनी जानुयुग्मे विप्रचित्ता पदद्वये |
तिष्ठ मे च तथा चोग्रा पादमूले न्यसेत् क्रमात् || 14 ||

प्रभा तिष्ठतु पादाग्रे दीप्ता पादांगुळीनपि |
नीला न्यसेद्बिंदुदेशे घना नादे च तिष्ठ मे || 15 ||

बलाका बिंदुमार्गे च न्यसेत् सर्वांगसुंदरी |
मम पातालके मात्रा तिष्ठ स्वकुलकायिके || 16 ||

मुद्रा तिष्ठ स्वमर्त्येमां मितास्वंगाकुलेषु च |
एता नृमुंडमालास्रग्धारिण्यः खड्गपाणयः || 17 ||

तिष्ठंतु मम गात्राणि संधिकूपानि सर्वशः |
ब्राह्मी च ब्रह्मरंध्रे तु तिष्ठस्व घटिका परा || 18 ||

नारायणी नेत्रयुगे मुखे माहेश्वरी तथा |
चामुंडा श्रवणद्वंद्वे कौमारी चिबुके शुभे || 19 ||

तथामुदरमध्ये तु तिष्ठ मे चापराजिता |
वाराही चास्थिसंधौ च नारसिंही नृसिंहके || 20 ||

आयुधानि गृहीतानि तिष्ठस्वेतानि मे सदा |
इति ते कीलकं दिव्यं नित्यं यः कीलयेत् स्वकं || 21 ||

कवचादौ महेशानि तस्यः सिद्धिर्न संशयः |
श्मशाने प्रेतयोर्वापि प्रेतदर्शनतत्परः || 22 ||

यः पठेत्पाठयेद्वापि सर्वसिद्धीश्वरो भवेत् |
सवाग्मी धनवान् दक्षः सर्वाध्यक्षः कुलेश्वरः || 23 ||

पुत्र बांधव संपन्नः समीर सदृशो बले |
न रोगवान् सदा धीरस्तापत्रय निषूदनः || 24 ||

मुच्यते काळिका पायात् तृणराशिमिवानला |
न शत्रुभ्यो भयं तस्य दुर्गमेभ्यो न बाध्यते || 25 ||

यस्य देशे कीलकं तु धारणं सर्वदांबिके |
तस्य सर्वार्थसिद्धिः स्यात् सत्यं सत्यं वरानने || 26 ||

मंत्राच्छतगुणं देवि कवचं यन्मयोदितं |
तस्माच्छतगुणं चैव कीलकं सर्वकामदं || 27 ||

तथा चाप्यसिता मंत्रं नीलसारस्वते मनौ |
न सिद्ध्यति वरारोहे कीलकार्गळके विना || 28 ||

विना कीलकार्गलके काळी कवचं यः पठेत् |
तस्य सर्वाणि मंत्राणि स्तोत्राण्यसिद्धये प्रिये || 29 ||

इति श्री काळी कीलक स्तोत्रं |